# शिक्षा–निदेशालयः राष्ट्रिय–राजधानी–क्षेत्रम्, देहली–सर्वकारः

## मध्यावधिः–अभ्यासप्रश्नपत्रम्– 2025-26

## कक्षा-– अष्टमी संस्कृतम्

**समयः 2.5 hr.** **पूर्णाङ्कः 60**

**सामान्य-निर्देशाः**

सर्वे प्रश्नाः अनिवार्याः।

उत्तराणि संस्कृतेनैव लेखनीयानि।

प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।

प्रश्नसंख्या अवश्यमेव लेखनीया।

प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

- खण्ड 'क' अपठित-अवबोधनम् 8 अंकाः
- खण्ड 'ख' रचनात्मक–कार्यम् 12 अंकाः
- खण्ड 'ग' अनुप्रयुक्त-व्याकरणम् 18 अंकाः
- खण्ड 'घ' पठित-अवबोधनम् 22 अंकाः

**खण्ड-क**

**अपठितांश अवबोधनम्** 8 अंकाः

**1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत–**

वसन्तस्य ऋतोः अनन्तरं ग्रीष्मकालो भवति। ग्रीष्मकाले जलाशयाः स्वल्पं जलवन्तःभवन्ति, कतिपये जलाशयाः शुष्यन्ति। दिनानि दीर्घाणि, रात्रयश्च लघ्व्यः भवन्ति। वायुमण्डले तापः वर्धते। सूर्यकिरणाः प्रखराः असह्याश्च भवन्ति। सर्वे प्राणिनः पिपासया व्याकुलाः जायन्ते, मध्याह्ने छायाम् इच्छन्ति। हरिताः वनस्पतयः लता: कुसुमानि च म्लायन्ते। मनुष्याः दिवसे गृहेषु तिष्ठन्ति, विवशाः एव बहिर्गच्छन्ति। अतएव विद्यालयेषु ग्रीष्मावकाशः दीयते। ग्रीष्मावकाशे भ्रमणाय केचित् पर्वतीयस्थलानि गच्छन्ति, केचन च समुद्रप्रदेशेषु गच्छन्ति। तत्र वातावरणं शीतलं भवति। अतस्तेषु स्थलेषु जनसम्मर्दः जायते। निवासाय स्थानं च दुर्लभं भवति आधुनिके वैज्ञानिके युगे ग्रीष्मतापनिवारणाय तापनियन्त्रणयन्त्रं (ए०सी०) विकसितम्। सम्पन्नानां जनानां गृहेषु तद् दृश्यते। किन्तु साधारणाः जनाः विद्युद्व्यजनेन तापं दूरीकुर्वन्ति, प्रशीतकम् (फ्रिजनामकम्) जलं शीतलीकरोति। किन्तु ग्रामेषु घटस्य महत्त्वं वर्तते अतः ग्रामीणाः जनाः घटस्य जलं पिबन्ति।

**अ) एकपदेन उत्तरत - (केवलं प्रश्नत्रयम्)** **3×1=3**

i) कस्मिन् काले जलाशयाः स्वल्पं जलवन्तः भवन्ति?

ii) कस्य ऋतोः अनन्तरं ग्रीष्मकालो भवति?

iii) वायुमण्डले किं वर्धते?

iv) ग्रामीणाः जनाः कस्य जलं पिबन्ति?

ब) **पूर्णवाक्येन उत्तरत– (केवलं प्रश्नमेकम्)** **1 x2=2**

i) ग्रीष्मकाले दिनरात्र्योः स्थितिः कथं भवति?

ii) वैज्ञानिके युगे ग्रीष्मतापनिवारणाय किं विकसितम्?

स) **यथानिर्देशम् उत्तरत- (केवल प्रश्नद्वयम्)** **2×1=2**

i) 'मध्याह्ने छायाम् इच्छन्ति' अस्मिन् वाक्ये किं क्रियापदं प्रयुक्तम् ?

(क) मध्याह्ने (ख) इच्छन्ति (ग) छायाम् (घ) न किमपि

ii) 'हरिताः वनस्पतयः' अत्र किम्विशेषणपदम् प्रयुक्तम् अस्ति?

(क) हरिताः वनस्पतयः (ख) वनस्पतयः (ग) हरिताः (घ) न किमपि

iii) 'सुलभम्' इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम्?

(क) दुर्लभम् (ख) जनाः (ग) घटः (घ)प्रशीतकम्

**(द) अस्य अनुच्छेदस्य कृते उपयुक्त शीर्षक संस्कृतेन लिखत।** **1**

**खण्ड-ख**

**रचनात्मक कार्यम् 12 अंकाः**

**2. चित्रं दृष्ट्वा मञ्जूषातः पदानि चित्वा चत्वारि वाक्यानि लिखत** **4x2=8**




**मञ्जूषा**

| |
|---|
| **गजः, अस्ति, सिंहः, बालाः, अहम्, मार्गः, सरोवरः, कपिः , मकरः, बकः, गर्दभः, उष्ट्रः, जन्तुशाला, भ्रमन्ति, आतपे, उपविशन्ति** |

अथवा

**'विद्याधनम्'** इति विषयम् अधिकृत्य चत्वारि वाक्यानि लिखत।

**प्र.3 पदानां मेलनं कृत्वा वाक्य रचनां कुरुत-** **4 x1=4**

| | | | |
|---|---|---|---|
| (i) | मृगात् | चरणं | जायते |
| (ii) | लुब्धस्य | अङ्गुल्यः | सन्ति |
| (iii) | पुरतः | यशः | निधेहि |
| (iv) | पञ्च | कस्तूरी | नश्यति |

## खण्ड-ग

**अनुप्रयुक्त-व्याकरणम्** **18 अंकाः**

**प्र.4 अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत (केवलं प्रश्नत्रयम्) 3x1=3**

i) प्लास्टिकस्यूतानि **च+अपसार्य** पिहिते अवकरकण्डोले क्षिपन्ति।।

ii) **कलमेत्यादीनि** सर्वाणि तु प्लास्टिकनिर्मितानि भवन्ति।

iii) **आर्यभटस्यापि** विरोधः अभवत्।।

iv) अस्माकं **प्रथमोपग्रहस्य** नाम आर्यभट इति कृतम्।

**प्र. 5 अधोलिखितं प्रकृतिप्रत्ययं संयुज्य वियुज्य वा पदानि सृजत (केवलं प्रश्नत्रयम्) 3x1=3**

i) उप+विष्टः = ......................

ii) प्रति + रोधः = .........................

iii) अति+ आचारः .........................

iv) आगच्छति ...........+............

**प्र.6 मञ्जूषातः चित्वा समुचिताव्ययेन रिक्तस्थानानि पूरयत (केवलं प्रश्नत्रयम्) 3x1=3**

(i) एतत् .................. सर्वथा अशोभनं कृत्यम्।

(ii) पर्यावरणेन................... पशवः अपि रक्षणीयाः।

(iii) यदा पृथिव्याः छायापातेन चन्द्रस्य प्रकाशः अवरुध्यते................... चन्द्रग्रहणं भवति।

(iv) गृहे यथा सर्वाधिका रम्या भगिनी भवति.................. भारतगृहे अपि सर्वाधिकाः रम्याः इमाः सप्तभगिन्यः सन्ति।।

**मञ्जूषा**

| |
|---|
| तथा, तदा, तु, सह |

**प्र. 7 उचितशब्दरूपाणि चित्वा रिक्तस्थानानि पूरयत– (केवलं प्रश्नत्रयम्) 3x1=3**

(i) मम………… (गृह) …………… पुरतः मन्दिरम् अस्ति। (गृहं/गृहस्य)

(ii) रमेशः …………(हस्त)……….. क्रीडति। (हस्ताभ्यां/ हस्तयोः)

(iii) राकेशः ……(मुख)…………… कथां कथयति। (मुखेन/ मुखात्)

(iv) …………(शिक्षक)……… नमः। (शिक्षकेभ्यः, शिक्षकान्)

**प्र.8 उचितशब्दरूपाणि चित्वा रिक्तस्थानानि पूरयत– (केवलं प्रश्नत्रयम्) 3x1=3**

i.) मानवाः अस्माकं ……………. विरमन्ति। **छायायां/ छायया**

**ii.)** एतस्यां……………. रात्रौ कोऽपि जीवः आगच्छति। **गुहायाः / गुहायां**

**iii.)** अधुना आपणे वस्तुक्रयार्थं ……………. अनिवार्यता नास्ति। **रुप्यकाणाम्/ रुप्यकं**

**iv.)** चञ्चलः ……………. अपृच्छत्। **नदीजलं/ नदीजलेन**

**प्र.9 उचितधातुरूपाणि चित्वा रिक्तस्थानानि पूरयत (केवलं प्रश्नत्रयम्) 3x1=3**

**i.)** त्वं मां खादितुम् …………….। **इच्छति/ इच्छसि**

**ii.)** अधुना आपणे वस्तुक्रयार्थम् आवश्यकता…………….।**नास्ति/ नासीत्**

**iii.)** नूनमेषा गुहा स्वामिनः सदा समाह्वानं …………….। **करोति/ कुर्वन्ति**

**iv.)** वयं सर्वाणि कार्याणि साधयितुं समर्थाः …………….। **भविष्यति/भविष्यामः**

## खण्ड-घ

**पठित-अवबोधनम् 22 अंका:**

**प्र.10 अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरत- 5**

आसीत् कश्चित् चञ्चलो नाम व्याधः। पक्षिमृगादीनां ग्रहणेन सः स्वीयां जीविकां निर्वाहयति स्म।। एकदा सः वने जालं विस्तीर्य गृहम् आगतवान्। अन्यस्मिन् दिवसे प्रातःकाले यदा चञ्चलः वनं गतवान् तदा सः दृष्टवान् यत् तेन विस्तारिते जाले दौर्भाग्याद् एकः व्याघ्रः बद्धः आसीत्। सोऽचिन्तयत्, 'व्याघ्रः मां खादिष्यति अतएव पलायनं करणीयम्। व्याघ्रः न्यवेदयत्-'भो मानव! कल्याणं भवतु ते। यदि त्वं मां मोचयिष्यसि तर्हि अहं त्वां न हनिष्यामि।' तदा सः व्याधः व्याघ्रं जालात् बहिः निरसारयत्। व्याघ्रः क्लान्तः आसीत्। सोऽवदत्, 'भो मानव! पिपासुः अहम्। नद्याः जलमानीय मम पिपासां शमय।

**अ) एकपदेन उत्तरत– (केवलं प्रश्नमेकम्) 1x1 = 1**

i. किं नाम व्याधः आसीत्?

ii. व्याधः कुत्र जालं विस्तीर्य गृहम् आगतवान्?

**ब)पूर्णवाक्येन उत्तरत– (केवलं प्रश्नमेकम्) 1x2 = 2**

i. व्याधः केन स्वीयां जीविका निर्वाहयति स्म ?

ii. व्याघ्रः मानवं किं न्यवेदयत् ?

**स) यथानिर्देशम् उत्तरत- (केवलं प्रश्नद्वयम्)** **2x1 = 2**

**i) 'स्वीयां जीविकां' अनयोः पदयोः किं विशेष्यपदम् अस्ति?**

क) स्वीयां ख) जीविकां ग) अनयोः पदयोः घ) न किमपि

**ii) 'सायं' पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम्?**

क) व्याघ्रः ख) व्याधः ग) प्रातः घ) मध्याह्नम्

**iii) "भो मानव! कल्याणं भवतु ते" अत्र किं क्रियापदम्?**

क) ते ख) भो मानव! ग) कल्याणं घ) भवतु

**प्र.11 अधोलिखितं पद्यांशं पठित्वा प्रश्नान् उत्तरत-** **5**

चल चल पुरतो निधेहि चरणम् । सदैव पुरतो निधेहि चरणम्।।

गिरिशिखरे ननु निजनिकेतनम्। विनैव यानं नगारोहणम् बलं स्वकीयं भवति साधनम्।

पथि पाषाणाः विषमाः प्रखराः। हिंस्राः पशवः परितो घोराः ।।

सुदुष्करं खलु यद्यपि गमनम् सदैव पुरतो निधेहि चरणम्।।

**अ) एकपदेन उत्तरत– (केवलं प्रश्नमेकम्)** **1x1=1**

i. सदैव पुरतो किं निधेहि ?

ii. विनैव यानं कुत्र आरोहणं कर्तुं शक्यते?

**ब) पूर्णवाक्येन उत्तरत– (केवलं प्रश्नमेकम्)** **1x2= 2**

i. कुत्र ननु निजनिकेतनं कर्तुं शक्यते ?

ii. पथि के विषमाः प्रखराः सन्ति?

**स) यथानिर्देशम् उत्तरत- (केवलं प्रश्नद्वयम्)** **2x1= 2**

i. 'पाषाणाः' अत्र का विभक्तिः अस्ति?

क) प्रथमा ख) पञ्चमी ग) सप्तमी घ) द्वितीया

ii. 'गिरिशिखरे' पदस्य किं पर्यायपदं पद्यांशे प्रयुक्तम्?

क) हिमालयशिखरे ख) राष्ट्रशिखरे ग) गिरिशिखरे घ) मस्तकशिखरे

iii. 'परकीयम्' पदस्य किं विलोमपदं पद्यांशे प्रयुक्तम्?

क) नगारोहणम् ख) स्वकीयं ग) बलं घ) साधनम्

**प्र.12 अधोलिखितं संवादं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत–** **5**

"शालिनी ग्रीष्मावकाशे पितृगृहम् आगच्छति। सर्वे प्रसन्नमनसा तस्याः स्वागतं कुर्वन्ति परं तस्याः भ्रातृजाया उदासीना इव दृश्यते"

**शालिनी-** भ्रातृजाये! चिन्तिता इव प्रतीयसे, सर्वं कुशलं खलु ?

**माला -** आम् शालिनि! कुशलिनी अहम्। त्वदर्थं किम् आनयानि, शीतलपेयं चायं वा?

**शालिनी -** अधुना तु किमपि न वाञ्छामि। रात्रौ सर्वैः सह भोजनमेव करिष्यामि।

(भोजनकालेऽपि मालायाः मनोदशा स्वस्था न प्रतीयते स्म परं सा मुखेन किमपि नोक्तवती )

**राकेशः-** भगिनि शालिनि ! दिष्ट्या त्वं समागता। अद्य मम कार्यालये एका महत्त्वपूर्णा गोष्ठी सहसैव निश्चिता। अद्यैव मालायाः चिकित्सिकया सह मेलनस्य समयः निर्धारितः त्वं मालया सह चिकित्सिकां प्रति गच्छ, तस्याः परामर्शानुसारं यद्विधेयं तद् सम्पादय।

**शालिनी-** किमभवत्? भ्रातृजायाया: स्वास्थ्यं समीचीनं नास्ति ? अहं तु ह्यः प्रभृति पश्यामि सा स्वस्था न प्रतिभाति इति प्रतीयते स्म।

**राकेशः-** चिन्तायाः विषयः नास्ति। त्वं मालया सह गच्छ। मार्गे सा सर्वं ज्ञापयिष्यति।

**अ) एकपदेन उत्तरत– (केवलं प्रश्नमेकम्)** **1x1 = 1**

i. शालिनी कदा पितृगृहम् आगच्छति?
ii. शालिन्याः भ्रातृजाया कथमिव दृश्यते"?

**ब) पूर्णवाक्येन उत्तरत– (केवलं प्रश्नमेकम्)** **1x2 = 2**

i. राकेशः शालिनीं किम् उक्तवान्?
ii. शालिनी राकेशं किम् उक्तवान्?

**स) यथानिर्देशम् उत्तरत- (केवलं प्रश्नद्वयम्)** **2x1 = 2**

i. 'चिकित्सिकया' अत्र का विभक्तिः अस्ति?
क) द्वितीया ख) प्रथमा ग) तृतीया घ) पञ्चमी

ii. 'भगिनि शालिनि' अनयोः पदयोः किं विशेषणपदम् अस्ति?
क) शालिनि ख) भगिनि ग) उभयमपि घ) न किमपि

iii. 'इच्छामि' पदस्य किं पर्यायपदम् गद्यांशे प्रयुक्तम् अस्ति?
क) अस्मि ख) वाञ्छामि ग) ऐषमि घ) चिन्तयामि

**13. मञ्जूषातः समुचितानि पदानि चित्वा अधोलिखितश्लोकस्य अन्वयं पूरयत–** **3x1= 3**

पथि पाषाणाः विषमाः प्रखराः, हिंस्राः पशवः परितो घोराः।

सुदुष्करं खलु यद्यपि गमनम् सदैव पुरतो निधेहि चरणम्।।

**मञ्जूषा**

| गमनम्, पाषाणाः, हिंस्राः |
|---|

**अन्वयः**– पथि विषमाः प्रखराः …… (i)……. प्रसृताः सन्ति, परितो घोराः ……(ii)……पशवः भ्रमन्ति।

यद्यपि खलु सुदुष्करं …. (iii)…. अस्ति, पुनरपि सदैव पुरतो चरणम् निधेहि।।

**प्र. 14 प्रश्नपत्रादतिरिच्य स्वपाठ्यपुस्तकात् कमपि श्लोकद्वयं संस्कृतेन लिखत।** **2x2=4**

श्लोक-1 …………………………………………………………………

…………………………………………………………………

श्लोक-2 …………………………………………………………………

…………………………………………………………………

s